International Journal of Sanskrit Research 2022; 8(1): 201-206

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(1): 201-206
© 2022 IJSR
www.anantaajournal.com
Received: 09-11-2021
Accepted: 12-12-2021

**संहिता दाश**
प्रफेसर एसिस्ट्यान्ट प्रफेसर तथा एच.ओ.डि, संस्कृत बिभागः, रामठाकुर कलेजः गभः अफ ट्रिपुरा, आगरतला, त्रिपुरा, भारत

**Corresponding Author:**
**संहिता दाश**
प्रफेसर एसिस्ट्यान्ट प्रफेसर तथा एच.ओ.डि, संस्कृत बिभागः, रामठाकुर कलेजः गभः अफ ट्रिपुरा, आगरतला, त्रिपुरा, भारत

# बैषयिकाध्यात्मिक-समुन्नति-संसाधने बेदानुसन्धानम्

## संहिता दाश

### प्रस्तावना

बिश्वसाहित्यसमूहानां मध्ये बेदः श्रेष्ठ स्तथा बरिष्ठः ग्रन्थः। यद्यपि बेदः अपौरुषेयरुपेण निहितः, प्राचीनकालात् प्रभृति, तथापि तत्रैब प्राप्यते न केबलम् ऐश्वरिकाबदानम्। बिशेषतः बैषयिक-भाबबिच्छिन्ना न तु चतुर्बेदाः। बेदे ईश्बरस्य पितृत्बं बन्धुत्बं तथा सख्यत्बम् उच्चारितम्। किं बहुना अथर्बबेदे सर्बदिक्षु तस्य महानुभबतायाः एकरुपत्बं प्रतिपादितं, सूक्ते चोच्यते ईश्बर एकाङ्गे पिता,भ्राता,पुत्र बा मात्रकुक्षिगतजीबः एब परिकल्पते ऋषिभिः यथा-१

"उतैषां पितो न बा पुत्र
एषामुतैषां ज्येष्ठ बा कनिष्ठः।
एको ह देबो मनसि प्रबिष्ठ
प्रथमो जातः स उ गर्भे अन्त॥
(१०/८/२८)

अत्र लिङ्गालिङभेदाभेद-ज्ञानमपि नैब प्राकट्यते। एबमेब ऐक्यरुपम् ऐश्बर्यम् अध्यात्मिकमननक्रियासु बिशेषेन ग्राह्यम्। मानसिकजटिलता आध्यात्मिकध्याने बा जागतिककर्म्मनि बाधासृष्टिकारिणी भबति। ऋग्बेदस्य बिख्यातसूक्ते बिबिच्यते-२

"एकं सद्बिप्रा बहुधा बदन्त्यग्निं
यमं मातरिश्बानमाहुः ॥ (१/२२/१६४/४६)

यद्यपि भिन्नाभिन्नभाबेन ऋग्बेदादिग्रन्थेषु भिन्नभिन्न देबतामाहात्म्यम् आकृष्य सूक्ते। सूक्ते छन्दोबिनियोगशैली मन्त्राबलि बिस्तरशः आलोचना कृता ऋषिभिस्तथापि। तन्मध्ये बैषम्यं कदापि नानुभूयते बा भेदबादः नैब पिन्डीक्रियते। फलतः इन्द्रस्य पितृ-मातृत्बम् उभयस्बरुपत्बम् एकाकारेण ऋग्बेदे ध्बनितम्- ३

"त्बं हि नः पिता बसो
त्बं माता शतक्रतो बभूबिथ इति।
(६/७/२,८/१०/८३)

अन्यत्र अयम् इन्द्रः परिकीर्तितः-

"जनिता दिबो जनिता पृथिब्याः
पिता सोमं मदायकं शतक्रतो ॥इति ऋग्बेद बचनात्।
(६/३/१८, ८/५/३६ सूः)। ४

सर्बोपरि तद्वेदे तु मौलिकद्रृष्टिबशात् देबतानां साम्यं सूचितम्, एकत्बप्रतिपादकत्ब-रुपचित्रं मन्त्रेषु उज्ज्बलीकृतम्।
बहुनामबिद्यमाने देबतास्तोमे, तथापि तेषाम् आधिपत्यम् एकीभूतम् अथर्बबेदस्य प्राञ्जलमन्त्रेषु यथा-५

"न द्बितीयो न तृतीयश्चतुर्थो नाप्युच्यते।
न पञ्चमो न षष्ठः सप्तमो नाप्युच्यते।
नाष्टमो न नबमो दशमो नाप्युच्यते।
.......स एष एक बृदेक एब।
(१३/४/१६-१८)

बस्तुतस्तु एबंबिधचिन्ताधारा धर्मसाम्प्रदायिकतां दूरीकृत्य सामाजिकजीबनजन-जीबने शान्ति-शृङ्खल-सम्प्रीति-सूत्रम् अधुनातनकालेऽपि आनेतुम् अबश्यमेब पारयति। किं बहुना तर्कबितर्कबिस्तारेण! कारणं देबता भाब्यते सामवेदे सर्बमहत् कार्याणां कारणम् -यथा- "सम्राजन्तमध्बराणाम्। (२/२/१७) ६ परबर्तिनिकाले उपनिषत् सु एकेश्बरबादस्य चिन्तनम् ऋग्बेदादि संहिताभ्यः आगतम्।
बेदमन्त्राः ऐक्यमूलकाः। बेदेषु तत् कालोचितसमाजसंसारपरिबारेषु उज्जीबितानाम् अभिज्ञतानाम् उपादानानि लक्ष्यन्ते, तत्तु अस्माकं बैषयिकचिन्तनचत्बरेषु मङ्गलानि निश्चितं संयुज्यन्ते।
अस्मिन् क्षेत्रे डः सीतानाथ दे महोदयेन तस्य बेदगबेषणाग्रन्थे लिख्यते यत् ७
"The Sukla Yajurveda illustrates that a student girl was advised to lead a life of celibacy and gaher knowledge from different learned ladies." (P-31)

फलतः नारीणां ऐहिकपारत्रिकयोः उतकर्षसम्पादने ज्ञानार्जने तथा ब्रह्मचर्यपालनस्य नीतिः तत् काले चलति स्म।

प्रसङ्गतः श्रीमता चिदाम्बरम कुलकार्णी महोदयेनोक्तम्-८

"Dharma pervades the entire fabric of the social life; affection and harmony were its key- notes. The concept of all-protecting Father was adopted, from the Rigveda onwards, in religion, society, politics, education and economic life."(Vedic Foundation of Indian Culture, p-95)

सामाजिकसम्प्रीतिसंबर्धनाय
बस्तुतान्त्रिकबहुचिन्ताप्रबर्तनमभबत् केबलम् चतुर्बेदीय सुक्तषु। शक्ति-भक्ति-सूक्ति-मुक्ति-प्रयुक्तिप्रबर्धनाय नानाबिधकर्मानि उद्घोषितानि बेदमन्त्रमाल्येषु। अथर्बबेदे ऋषिना उच्चार्यते नानाबिधप्रणाली दीर्घायुर्मनोबल-नीरोगत्ब-सामाजिकप्रतिष्ठाप्रभृतीन् आहतुम् ऐहिकसमुन्नतिबिधानस्य कृते।
बेदबादिनः ऋषयः जीबनबादिनः, न ते पलायन-मनोबृत्तिसमेताः। धूलिकणाबिजड़ितमर्तलोके ऋषिभिः अमृतस्पर्शम् अनुभूयते। तदर्थम् इहलोके दीर्घजीबनं धारयितुं तेषां हार्दिक - प्रार्थना अथर्बबेदाङ्गिके श्रुयते-९

"पश्येम शरदः शतम्
जीबेम शरदः शतम्
बुध्येम शरदः शतम्
रोहेम शरदः शतम्
पुषेम शरदः शतम्
भबेम शरदः शतम्
भूयेम शरदः शतम्
भूयसी शरदः शतम् ॥ "(९ /६७)

ते न केबलं शतबर्षपर्यन्तं जीबितुमिच्छन्ति। तदधिकं शतशरत् कालेभ्यः अधिकतरं द्रष्टुं तेषाम् आग्रहः लक्ष्यते एबम् प्रार्थना सर्बजनानां हिताय आर्य ऋषिणा उच्चार्यते यथा-

"यथेमां बाचं कल्यानीमाबदानि जनेभ्यः।
ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्बाय चारणाय ॥
(२६/२)

सकलपर्यायभुक्तजनगणहितार्थाय बैदिकी बानी ऐक्यबिबर्धिनीति पुर्बोक्त-सूक्ते परिकीर्तिता।
तज्जन्यकर्मप्रबाहे देबता स्तूयते गृहस्बामिनः रक्षकरुपेण शुभेच्छाकामिरुपेण आकाशस्थदुर्योगनिबारनाय अभिभाबकपदबाच्येन। सामबेदीय गिरा स्मर्तब्यम्-

"अप्रोषिबान् गृहपते महान् असि
दिबस्पायुर्दुरोणयुः ॥"

तत्र ऋग्बेदे चोच्यते - " अकारि -रत्नधातम् " १०(प्रथम मन्डल) यदा स्तोत्रेण तुष्टा ऋषबो तदा धनं ददति बिपरीतमेतत्ते तुदन्ति बिपरितकारिजनान्। बेदानुरक्तम् ईद्दक् कर्म पारिबारिकबिषयेषु बैभबं दातुं शक्नोति। साधक श्रीअनिर्बाण तस्य गबेषणा ग्रन्थे पर्यालोच्यते यत बैदिकसाहित्ये अध्यात्यसाधनाया रूपं देबबादेन मन्डितं तथा तद्देबबादस्य भित्तिस्थलं हि " श्रद्धा "। ११ मूलतः श्रद्धा मानब- चित्तस्य मौलिकबृत्तिबिशेषः। अत्र प्रासङ्गिकः "तपः पबित्रं बेदस्य " १२

बेदबेदान्तयोर्मध्ये अति परिणता एका आध्यात्मिकी संस्कृतेः स्बाभाबिक-आत्मप्रकाशः घटते स्म इति ऋषि अरबिन्दस्य सम्यक् मन्तब्यम्। १३
बेदेषु बिशेषतो लक्ष्यते तिस्र एब देवताः। तन्मध्ये सन्ति यथा अग्निर्देबः पृथिबीस्थानः,बायुर्बा अन्तरिक्षस्थानः,सूर्यश्च द्यु-स्थानः। भगबता शौनकेन प्रोक्तम् - १४

"प्रथमो भजते त्वासां बर्गोऽग्निमिहदैबतम्।
द्वितीयो बायुर्मिन्द्रं बा, तृतीयः सूर्यमेब च ॥ "

यद्यपि देवतानां नामानि बेदेषु बहुत्बबादे समबलोक्यते तथापि तत्र बैदिक -ऋषिभिः एकत्बबादे आस्ताशीलाः। किन्तु एको हि महान् आत्मा बेदबादिगणकर्तृक - इन्द्रमित्रसूर्यादिः पृथक् पृथक् नाम्ना कीर्तिताः। मन्त्रेस्थितः तद्धि यथा- १५

"इन्द्रं मित्रं बरूणमग्निमाहुरथो
दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्बिप्रा बहुधा बदन्त्यग्निं
यमं मातरिशानमाहुः॥ "सू.४६

एक आत्मा निरुक्त-बचने लक्ष्यते बहुधा स्तूयते। १६ एकात्मा बैभबशालिनी भूत्बा बहुधा स्तूयमानः इति बक्तब्यम् ऋग्बेदे। १७
अन्यान्य बेदेषु पठ्यते ईश्बरस्य एकशीर्षकस्य अस्तित्बं यथा - अथर्वबेदसंहितायाम् "सर्बे अस्मिन् देबा एकबृतो भबन्ति। " १८

अस्मिन् बेदे अन्यदिशि एकबिधबार्ता बिधीयते -
"एक एब नमस्य सुशेबाः।" १९

अत्र तद्बत् तथ्यमस्ति। "एक एब नमस्यो।" २०
एकस्य ईश्बरस्य रूपबैचित्र्यं समभाबेन प्राकट्यते सर्बेषु बेदेषु।

तथा तु ऋग्बेदे " य एक इत्तमुं बिचर्षणि। " २१
तत्र यजुर्वेदसंहितायाम् एकमेबेश्बरतत्बं प्रतिपादितम्। २२

बिशेषतः ऋग्बेदे अन्यबिभागे मया सम्यक् प्राप्यते २३ सुपर्ण बिप्रा कबयोबचोभिरेक इत्यादिः। बेदानुबादक Maxmullar महाशयस्य मन्तब्यम् - " The great divinity of the Gods is one ."

अध्यात्यबिद्या तथा तदुतकर्षबिषये यथार्थमुक्तम् - यथा दुर्लभ गायत्री मन्त्रममोघफलदायकम् २४

"Some of the progress of the Rigveda, like the Gayatri Mantram, touch the highest point of knowledge and sustain human soul to this day, while no Hindu, however modernized, will permit a single alteration of their original accents, syllables, or words ." २५

बिश्बस्मिन् जगति बैषयिक बस्तुसमूहानाम् उपभोगम् कर्तुं न निषेधः बिधीयते। किन्तु निर्लोभेन साकम्। २६
पाश्चात्य पन्डित Muir महोदयस्य बक्तब्ये दृश्यते लक्ष्यते देबतानां ऐशी शक्तिद्योतके एकेश्बरबादः। प्रत्येकदेबतानां ऐश्बरिकीशक्तिः तासां एकरुपतः प्रदर्शिता। नासि भिन्नः भिन्नः भाब-द्योतना। अथर्बबेद-संहितायाः प्रथमकान्डात्मक प्रथमानुबाके प्रथमसूक्ते ऋषिणा अनुभूयते यत् भगबता असंखरुपाणि संगृह्य जगत हितहेतबे चेतनाचेतनमध्येषु परिभ्रमणं क्रियते,हे बाचस्पतिदेब,मया तदेब भगबद्बिषयक- ज्ञानम् प्राप्तुं तत् समीपे प्रार्थ्यते। २७
अतः पुनरेहि बाचस्पते रमय मय्येबास्तु मयि श्रुतम्। २८ अतएब अध्यात्मबिषयः मे मनसा मेलनम् कुरु इति ऋषेः अभिलाषः।
सप्तमे कान्डे परमात्मज्ञानं प्राप्तुम् ऋषिणा बारं बारं प्रार्थ्यते। २९ एबं प्रकारेण अथर्बबेदे आध्यात्मिकचिन्ताधारा ऋषिभिः उच्च्यार्यते। श्री अरबिन्देन यथार्थमुक्तम् - " किन्तु भारतीयात्मसंयमस्य उद्देश्यासीत् यत् साधारणं बाह्यं बा स्थलमहत्त्बं नैब हि,तत्तु आध्यात्मिकं मह्त्त्बं लब्धं इति ( मयानुदितम्)। ३०

'मूलतः जीबनस्य सर्बा दृष्टिभङ्गी आध्यात्मिकतया प्रभाबिता।' ३१

किन्तु अथर्वबेद संहितायां दरीदृश्यते बैषयिकभाबधाराया पर्बतप्रमानानि उपादानानि। यथा क्षुद्रापि दृष्टान्तं उक्त-देबस्य षष्ठ कान्डे लक्ष्यते - यथा-ऋषि तस्य स्बीयकन्याय केशबर्धनार्थं यत् औषधं खननं कृतं तद् यदा महर्षि-असितमुनेः गृहात् संगृहीतबान्। ऋषिणामपि एतादृशान्तरिक चेष्टाचिन्ता बैषयिक- चेतना स्थिता इति भाबः। ३२
मरणशीलेन ऋषिणा साकम् चिरजीबि-देबगणाभिः सह साक्षात् हृद्यता परिलक्षिता बेदेषु ऋषिकृतानां नानाबिधानां यज्ञानुष्ठाने बान्यानुष्ठाने। दरीदृश्यते शीर्षस्थानीय-ऋषि-बसिष्टेन सह हार्दिकमित्रता सदैब बिराजते ३३
प्रबलप्रतापाण्बितेन इन्द्रेन साकम्।अन्यदिक्षु अथर्बबेदे यज्ञकारिणा बेदमाता सरस्बतीसमीपेषु बस्तुजगति सुखसमृद्धये नानाकाङ्क्षितबिषयः प्रार्थ्यते -

"स्तुता मया बरदाबेदमाता......
आयुः प्राणं प्रजां पशुं कीर्तिं द्रबिणं ब्रह्मबर्चसम्।
मह्यं दत्त्बा ब्रजत ब्रह्मलोकम् ॥"

यज्ञदात्रा मित्राबरुणौ निकषा काम्यते धनं प्राप्तुं सर्बदा धनं प्रदाय मह्यं हृष्टं कुरु। अत्र शुक्लयजुर्बेदे बैषयिक चिन्तनं स्फुटम्। ३४

कृष्णयजुर्बेदसंहितायां त्रम्बकस्य पूजन ब्यापार प्रसङ्गेषु सन्दृश्यते ऋषिणा प्रार्थ्यते बिम्बफलमिब तेन जीबनं बिहाय भबेत्, किन्तु न तु अमृतम्। अस्मिन् बेदे प्रयुज्यते "त्र्यम्बकं यजामहे सुगन्धिं पुष्टिबर्धनं"

इति गुरुत्बपुर्णमन्त्रमाल्ये महामृत्युञ्जय साधना आयुर्बर्धनाय ब्यबहृतम्। ३५

अथर्बबेदे ऋषिणा देबं निकषा हार्दिक-भाबेन काम्यते तस्मै दातुं चिकित्साबिषयकं सामग्रीं ब्यबस्थातुं यद् द्वारा तेन शारीरिक-शक्तिबृत्तिं कृत्बाबाधभाबेन ध्यानकार्यं योक्तुं सक्षमः,अन्यथा रोगाक्रान्तो भूत्बा ध्यानकर्मणि ब्यर्थीभूतः सञ्जातः। ३६

बास्तबचिन्ता आध्यात्मिक परिसरे नैब बिलीनेति। अधिकन्तु ऋषे देहसौष्ठोभं लौहबत् भबेत् दृढ़म्। उच्यते अत्र "प्राणाय नमो यस्य सर्बमिदं बशे "। ३७ फलतः ऋषिणा भणितं "Blow thou medicine to us, blow away evil, you are the medicine of the Universe." ३८

ऋग्बेदे पारिबारिकबिषयेषु लक्ष्यते बिशेषः परामर्शः। तत्तु अस्य प्रथम मन्डलस्य द्वादश -मन्त्रे ऋषिणा भण्यते - अतिरिक्तं यत् सुबर्णं कलशमध्ये पूरयित्बा मृद् गर्ते रक्षणं कार्यम्।

दृश्यते यत्र राजकन्यकायाः पाणिग्रहणम् ऋषिणा क्रियते प्रथम मन्डलस्य पञ्चबिंशत्यधिक - शततमे सूक्ते।अतः ऋषिरपि न तु गार्हस्थ्यबुद्धिबर्जितः। दशममन्डलधृतस्य अक्षक्रीड़ाकलापस्य अशुभत्बं परित्यज्य कृषिकर्मणि मनोनिबेशद्वारा गोधनलाभाय परामर्शः बैषयिकः उन्नतिबिधायकः। नबममन्डले पार्थिबबस्तुलाभाय उपायाः उद्भाबिताः। किं बहुना, प्रथमे,दशमे(१०/३४ सू) बा अष्टममन्डले दानस्तुतिः (१/१२६ सू) दृश्यते।३९

दान् दानकारिणे लौकिक फलदायकं। दरिद्रेभ्यः दानं तु प्रशंसितम्। ऋक् संहितायां आप्रीसूक्ते (१०/५६-६०)अथर्बबेदबत् जीबनरक्षा,निद्रागमः ५/५ तथा अपत्यप्राप्तिबिषयकमन्त्रः बिद्यते।४०

ऋग्बेदे,ऋषिणा काम्यते हृदा "तनयाय शंयोः "। इत्यादिः। ४१

बिशेषतः यज्ञकाले सामगानं गुच्छरूपेण गीयते। यजमानानां हितार्थाय यजुर्मन्त्रा बिधीयन्ते। तत्र तु बैषयिकपारत्रिककल्याणकारणं ऋत्बिक् करोति यज्ञकर्म। तस्मात् अयं हि कर्मबेदः नाम्नापि ख्यातः।

शेषतः ऋषिभिः सह काम्यते अथर्बबेदीय मन्त्रे- ४२
"उत्तिष्ठ ब्रह्मणस्पते देबान् यज्ञेन बोधय।
आयुः प्राणः प्रजां पशून् कीर्तिं यजमानं च बर्धय ॥"

शुक्लयजुर्बेदसंहितायाम् आध्यात्मिकस्बास्थ्य- सम्पर्कित - मननबिषये सम्यगुक्तम्- ४३

शर्मासि।
अबधुतम् रक्ष ॥
अबधुत अरातय ॥ अर्थात् हे मम मनः, सुखस्य दायकः, सर्बं सुखम् आत्मिकम्। तब सङ्गताबशतः शुभस्य संयोजनेन दुर्मनस्क- शत्रब स्ताड़िता।

अतस्तद्दुष्कृतिपरायणाबेगो दूरीभूतञ्च॥। प्रसङ्गतः डः रबीन्द्रनाथ दाश शास्त्रिणा भणितम्-

"The humanistic appeal of the Vedas is mingled with the experiences of a large period of Indian Culture and Civilization as discerned and shaped by the Vedic Rishis and thinkers for the progress of human values and understanding through their hymnology." ४४

अन्यदिशि ऋषिमुखे बैषयिकचिन्ता श्रूयते यत् यदि केनचित् पुरुषेण तस्य स्त्रियं प्रति बिद्बेषं कुर्यात् तदा तत्तु कर्मकारस्य चर्म- निर्मिताग्नि बहिर्गताय यन्त्रेण दूरीभूतं भबेत्। (बैदिक भाषया - " ततस्तु इर्षं मुनचामि " इत्यादिः। ४५

ऋग्बेदे लक्ष्यते यजमानः अश्बिद्बयम् उद्दिश्य संयुज्यते बयं ते स्तोतारः अतः बयं दीर्घायुरन्नं प्राप्तियोग्याः। हे अश्बिद्बय ! देबतानां समीपेषु सोमं पिबतु। ४६

जागतिकबिश्बे बेदस्य बास्तबमुखिता दरीदृश्यते। ४७

"एबा हि ते बिभूतय उभय इन्द्र माबते " इत्यादि सूक्ते उक्तम् - इन्द्रदेबतामुद्दिश्य,त्बं हि हब्यदातुः रक्षणस्य हेतु स्तथा फलदात्रीति। एबं बचनं बास्तबबुद्धिसम्मतम्।

"असृग्रमिद्र ते गिरः " इत्यादि स्तुतिः इन्द्रं प्रति गच्छति। अस्याशयः " यजमानस्य स्तुतिमूलका बाण्यः अनेकोपकारयुक्ताः। यतः ताः स्बर्गस्थितं देबमिन्द्रं यज्ञस्थले आनेतुं समर्थाः। ......मर्त्ते आगत्य यजमानानां कामनां पुरयिष्यति।" ४८ अतः अत्र स्बर्गमर्त्तम् एकीकृतम् अर्थात् बैषयिकाध्यात्मिकयोर्मेलनमिति भाति।

नारीणामाध्यात्मिकी मेधा सर्बबादिसम्मतासीत्। पठ्यते ऋग्बेदस्य पञ्चममन्डले यथा ऋषिका बिश्बबारा अग्निदेबमुद्दिश्य यज्ञस्थाने अग्निस्तुतिः निबेदयति। हे अग्निदेब, अतःपरम् दीप्तियुक्तं भूत्बा कामनां पूरयतु। सा हि सूक्तरचयित्री। एबं ऋषिकाः बेदेषु अबलोक्यन्ते। ४९ नारी अध्यापिका अस्ति।

बिश्बबिजयी स्बामी बिबेकानन्देन तस्य नारीबिषयक- बक्तृता प्रदीयते आमेरिकाया भेट् ट्रयेट् शहरे १९१४ तम खीष्टाब्दस्य मार्चमासस्य पञ्चबिंशतिदिबसे यत्र तेन समुच्चार्यते " शास्त्रग्रन्थसमूहेषु तासां (नारीणां) गभीर श्रद्धा प्रदर्शिता। बहबो नार्यः ऋषित्बं लब्ध- बन्तः। तासामाध्यात्मिकता तदा प्रशंसनीयेति।"

(मया अनूदितः) ५०
बैदिकसमाजचत्बरे नारीणां स्बाधीनगतिबिधिसम्पर्कितबक्तब्ये सिभिलियन R.C.Datta, ICS (1848-1909) भणति स्म

"There were no unhealthy restrictions upon Hindu women in those days, no rules to keep them secluded or debarred from their legimate place in the society." ५१

अतीब समुन्नतबैदिकसमाजः यन्मध्ये चारित्रिक स्खलनं नैब लक्ष्यते। ततोऽधिकं कन्यानां बाल्यबिबाहो नैब घटते बैदिक-समाजे। ५२ परबर्तिनि कालेषु बाल्यबिबाहः समाजे सम्भबति यो हि बैदिक- सज्जन -पिता माता एबं चिन्ता सदैब अग्राह्यं मनसीकृतम्।
किन्तु क्यायै स्बीय पतिनिर्बचने स्बाधीनता प्रदीयते समाजे। एतद्बिषये कन्यानां परिबारेषु बा कुतुम्बादिमध्ये नैब बिन्दुमात्रं ५३ बिरुद्धाभासः। बैषयिक ब्यापारेषु एबमेब प्रथा प्राकट्यते। तदुत्तरकाले बिलोक्य जाड्यं पदे पदे।
बेदोत्तरकाले समाजे नारीजीबनं बिध्बंसीकरणां मारात्मक सतीदाह प्रथा प्रादुर्भूता। अहो स्बामिनः मरणात् तत् सहितं चितामध्ये प्राणबन्त -पत्नीजनस्य दाहलीला अमानबिक तथा मारात्मकशास्त्रनाम्ना आत्मजनानां सम्मुखे हत्यां क्रियते। एबं भयाबहं कार्यं तथा हृदयबिदारकं कान्डं बेदेषु नैबाबलोक्यते।
उक्तञ्च इतिहासबिद्भिः

"The Vedic Singers loved to dwell on the joys of life and seldom referred to death except in the case of enemies. When a man died, he was either cremated or buried. The burning of the widows does not appear to have been prevalent". ५४

तत्र सर्बपर्यायेषु सा हि सम्राज्ञीरुपेण कार्यकारिणी भबेत्। अधुना तत्तुल्य नारीणां उच्चैः स्बाधीनता अतीब बिरलदृष्टः। बैदिकयुगे कन्यानां बाल्यबिबाहो नैब प्रचलितः। प्रथमतः युबकस्य तुल्यः कन्यानां जीबनस्य प्रथमपर्यये ब्रह्मचर्य पालनीयं परिलक्ष्यते यथा इति। या या कन्या अबिबाहिता भूत्बा जीबनं यापयति सा सा कन्या पित्रालये पितृ धनस्य अंशभागिनी भबेत्। तद् द्बारा कन्या सम्मानिता इति ऋग्बेदीय - बार्ता। ५५
तत् काले कन्यापणं प्रचलितम् बिबाहब्यापारे। अधुना पुरुषशासित- समाजे तत् तु अबलुप्तम्। बेदेषु आध्यात्मिक चिन्ताधारायाः पार्श्बे बैषयिक चिन्ताचेष्टा चलति द्बन्द्बातीतभाबेन। समाजे बिबाह प्रथा सम्यग् रुपेण प्रचलिता। स्बामिगेहे कन्यानां बधूरुपेण बसबासस्य नियमा स्तत्र प्रबर्तते। समाजसंसारे स्त्रीणां शीर्षमर्यादा दरीदृश्यते। ऋग्बेद-संहितायां स्पष्टीकृतम् यदा नारी बिबाहान्ते पतिगृहे समुपस्थिता तदा गार्हस्थ्य धर्मस्य प्रतिपालनं तथा तत्र सर्बोच्च- कर्तृत्बं पत्नी हस्ते प्रदत्तमिति यथा- ५६

"सम्राज्ञी श्बशुरे भब
सम्राज्ञी श्बश्रां भब।
ननान्दरि सम्राज्ञी भब
सम्राज्ञी अधिदेबृषु ॥"

परबर्तिकाले मुनिना मनुनोक्तम् -५७ " यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देबताः। अथर्बबेद- संहितायाः बिधानमनुसृत्य रामायणे उक्तं पुत्रार्थे यज्ञक्रिया सम्पादनबार्ता। " ५८
आयुर्बेदस्य चिकित्सापद्धतिः बहुलांशे अथर्बबेदबर्णित चिकित्साशैलीं निकषा ऋणीति निश्चितं मन्यते। तत्रत्य आथर्बन्- पुरोहितानां भेषज- ज्ञानं बिशेषेण लक्षणीयम्। एबं बास्तबज्ञानस्य अभिब्यक्तिः महर्षि चरकेन ज्ञायते अथर्बबेदस्य महत्बं तथा उपयोगित्बमिति मन्यते। अथर्बबेद संहिता आयुर्बेदस्य आकरग्रन्थरुपेण भाब्यते बैद्यबिद्भिः। आयुर्बेदग्रन्थरत्नस्य आकरग्रन्थरुपेण अथर्बबेदस्य अबदानं चिकित्साबिज्ञाने सदैब स्बीकृतम्। महर्षि चरकेण कृता चरकसंहितायां रोगमुक्त जीबनं यापयितुम् अथर्बबेदस्य परामर्शं अनुकृतम्। बिश्बस्य प्राचीनतम- चिकित्साग्रन्थ - अथर्बबेदे शरीर - रक्षणाय सार्बिकदीप्तिमयी बाणी उच्चारिता -५९

"न तिथि न च नक्षत्र न ग्रहो
नो चन्द्रमा इत्यादि सूक्ते। "सर्ब कल्याणं भबेत् तिथि-नक्षत्र- ग्रहं बिनैब। चरक संहितायाम् ऋषिणा समुच्यते - ६०

"धर्मार्थकाममोक्षणम् आरोग्यम् -बलोमुत्तमम् " इत्यादिः। सर्बोपरि ऋषिणा देहारोग्यम् ऐहिक पारत्रिक - कर्म-साधयितुम्। आध्यात्मिक- परिमन्डले सामबेदे ऋषिणा तस्य उच्चाङ्गीन भाबनया उपलभ्यते - ६१

"ओं त्बं हि नः पिता
बसो त्बं माता
शतक्रतो भबुबिथ।
अथा ते सुम्नमीमहे ॥"

सर्बोज्ञ - ईश्बरसन्निधाने ऋषि स्तस्य स्थितिः शिशुबत् स्बयं निबेदयति। अगाधः काण्ब ऋषिणा गायत्री छन्दसा युज्यते - हे इन्द्रदेब, अस्मभ्यं देहि धनं (बाधः) - आध्यात्मिकं तथा बैषयिकमन्त्रः सर्बान् शत्रून् दूरीकृत्य। ६२

## अबगति - सूत्रम्


1. ऋग्बेद्द, २०/५/२८
2. तदेब, १/२२/२६४/४६
3. तदेब - ६/७/२, ८/२०/८३
4. तदेब - ६/३/२८, ८/५/३६
5. अथर्बबेद - १३/४/१३ - १८
6. सामबेद -२/२/१७
7. यजुर्बेद - डः सीतानाथ दे वेदश्री, आगरतला,पृ. ३१
8. Vedic Foundation-Chidambara Kulkarni of Indian Culture, p.95
9. अथर्बबेद, ९/६७
10. ऋग्बेद, प्रथम मन्डल।
11. बेद- मीमांसा, श्री अनिर्बाण,कलिकाता संस्कृत कलेज, प्रथम खण्ड, १९६१,पृ: ३
12. महाभारतम्,अनुशासन पर्ब, १२३ अध्यायः, श्लोक- ४
13. भारतीय संस्कृतिर् भित्ति, श्रीअरबिन्द, पन्डिचेरी, १९६९,पृ : ३३३
14. बृहद्देबता - १/५
15. बेदेर मन्त्रभागे अध्यात्मबिद्या, मः मः डक्टर योगेन्द्रनाथ बागची, कलिकाता, १९६५, पृ : २२
16. यास्ककृते निरुक्ते, दैबतकान्ड,७/४
17. ऋग्बेद संहिता, ३/३/२०
18. अथर्बबेद- संहिता, ०//२१//
19. तदेब, २/२/२
20. तदेब, २/२/१
21. ऋग्बेद, ३/४५/१६
22. यजुर्बेद, ४०/८
23. ऋग्बेद संहिता, १०/११४/५
24. "तत् सबितुर्बरण्यं भर्गो देबस्य धीमति।
25. धीयो यो नः प्रचोदयात् ॥ " ऋग्बेद संहिता, ३/७/१०
26. Hindu Civilization, Dr.Radha Kumud Mookerji, Longmans Green & co.London, 1936, p.82
27. यजुर्बेद, ८०-८१
28. अथर्बबेद- संहिता, १/१/१ सूक्त
29. तदेब, १/१/२ सू
30. तदेब, सप्तम कान्ड,प्रथम अनुबाक, १० सूक्त
31. भारतीय संस्कृतिर् भित्ति, श्री अरबिन्द, अरबिन्द आश्रम, पन्डिचेरी, १९६९,पृः २३५
32. तदेब, पृः: ६५
33. अथर्बबेद - संहिता, षष्ठ कान्ड, १३ अनुबाक, सू - १
34. The Visvamitras and the Vasisthas, Dr. Umesh Chandra Sharma, Aligarh,1975,p.202
35. शुक्ल यजुर्बेद - संहिता, षष्ठ अध्याय, ९/३
36. कृष्णयजुर्बेद संहिता, प्रथम कान्ड, अष्टम प्रपाठक।
37. अथर्बबेद - संहिता, कन्डिका - १, अनुबाक-१, सू - २
38. तदेब, कन्डिका -१,अनुबाक - ११,सू- १
39. Dr. Raghavan V. The Indian Heritage, Bangalore. 1956
40. ऋग्बेद,१/१२६
41. अथर्बबेद, १०/१८३
42. ऋग्बेद, १/१८९/२
43. अथर्बबेद, कान्ड -१९, अनुबाक - ७, मन्त्रः५
44. शुक्लयजुर्बेदः संहिता, यजुः कन्डिका, १४/१/१-३
45. Lectures on Indology, Dr. Rabindranath Das Shastri, Agartala, 2011, p.14
46. अथर्बबेद, कान्ड-६,अनुबाक - ३,सूक्त - ७
47. ऋग्बेद, १/१८०/७ (सम्पादना: रमेश चन्द्र दत्त,कलिकाता,१८८५,पृः -११६
48. तदेब, १/८/९ (सम्पादक: बेद, प्रफेसर् मानबेन्दु बन्द्योपाध्याय, कलिकाता,१९८१,पृः - २९
49. तदेब, १/९/४, पृ: ३२
50. तदेब, पञ्चम मन्डल,सूक्त -२८
51. स्बामीजीर् बाणी ओ रचना, दशम खन्ड,उद्बोधन, १९६३, पृः ४८
52. Ancient India, R.C.Datta,Delhi,New Ed.,p.20
53. ऋग्बेद, ८५, २१ -२२
54. Hindu Civilisation, Dr.Radha Kumud Mookerji, London,p.72
55. An Advance History of India, Dr.R.C. Majumder, Dr. H.C. Roychoudhury, Dr.K.K.Datta, London, 1956, p.32
56. ऋग्बेद, २/१७/७
57. ऋग्बेद, १०/८५/८६
58. मनुसंहिता ३/५६
59. रामायणम्,महर्षि बाल्मीकिकृतम्, बालकान्डम्, १५/२
60. अथर्बबेद, २/४
61. चरकसंहिता, प्रथम अध्याय, श्लोक -५
62. ६१)सामबेद,११७०
63. तदेब,पर्ब - १९४ - पर्ब-३,सूक्त -१, (The Hymns of the Samveda Samhita, Acharya Dharma Deva, Iwalapur (U.P.), 1967.